श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीन्यासविंशतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीन्यासविंशतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सिद्धं सत्संप्रदाये स्थिर धियमनघं श्रोत्रियं ब्रह्म निष्ठं
सत्वस्थं सत्य वाचं समय नियतया साधु वृत्त्या समेतम्।
डम्भासूयादि मुक्तं जित विषयि गणं दीर्घ बन्धुं दयालुं
स्खालित्ये शासितारं स्व पर हितपरं देशिकं भूष्णुरीप्सेत्॥ १ ॥

अज्ञान ध्वान्त रोधादघ परिहरणादात्म साम्यावहत्वात्
जन्म प्रध्वंसि जन्म प्रद गरिमतया दिव्य दृष्टि प्रभावात्।
निष्प्रत्यूहानृशंस्यान्नियत रसतया नित्य शेषित्व योगात्
आचार्यः सद्भिरप्रत्युपकरण धिया देववत् स्यादुपास्यः॥ २ ॥

सद्बुद्धिः साधु सेवी समुचित चरितस्तत्त्व बोधाभिलाषी
शुश्रूषुस्त्यक्त मानः प्रणिपतन परः प्रश्नकाल प्रतीक्षः।
शान्तो दान्तोऽनसूयुः शरणमुपगतः शास्त्र विश्वास शाली
शिष्य प्राप्तः परीक्षां कृतविदभिमतं तत्त्वतः शिक्षणीयः॥ ३ ॥

स्वाधीनाशेष सत्ता स्थिति यतन फलं विद्धि लक्ष्मीशमेकं
प्राप्यं नान्यं प्रतीया न च शरणतया कंचिदन्यं वृणीयाः।
एतस्मादेव पुंसां भयमितरदपि प्रेक्ष्य मोज्झीस्तदाज्ञाम्
इत्येकान्तोपदेशः प्रथममिह गुरोरेक चित्तेन धार्यः॥ ४ ॥

मोक्षोपायार्हतैवं भवति भव भृतां कस्यचित् क्वापि काले
तद्वद् भक्ति प्रपत्त्योरधिकृति नियमस्तादृशा स्यान्नियत्या।
शक्ताशक्तादि तत्तत्पुरुष विषयतः स्थाप्यते तद्व्यवस्था
यच्चाहुस्तद्विकल्पः सम इति कतिचित् तत्फलस्याविशेषात्॥ ५ ॥

सानुक्रोशे समर्थे प्रपदनमृषिभिः स्मर्यतेऽभीष्ट सिद्ध्यै
लोकेऽप्येतत् प्रसिद्धं न च विमतिरिह प्रेक्ष्यते क्वापि तन्त्रे।
तस्मात् कैमुत्य सिद्धं भगवति तु भरन्यास विद्यानुभावं
धर्म स्थेयाश्च पूर्वे स्व कृतिषु बहुधा स्थापयांचक्रुरेवम्॥ ६ ॥

शास्त्र प्रामाण्य वेदी ननु विधि विषये निर्विशङ्कोऽधिकारी
विश्वासस्याङ्गभावे पुनरिह विदुषा किं महत्वं प्रसाध्यम्।
मैवं घोरापराधैः सपदि गुरु फले न्यास मात्रेण लभ्ये
शङ्का पार्ष्णि ग्रहार्हा शमयितुमुचिता हेतुभिस्तत्तदर्हैः॥ ७ ॥

नेहाभिक्रान्ति नाशो न च विहतिरिह प्रत्यवायो भवेदिति
उक्तं कैमुत्य नीत्या प्रपदन विषये योजितं शास्त्रविद्भिः।
तस्मात् क्षेत्रे तदर्हे सुविदित समयैर्देशिकैः सम्यगुप्तं
मन्त्राख्यं मुक्ति बीजं परिणति वशतः कल्पते सत्फलाय॥ ८ ॥

न्यासः प्रोक्तोऽतिरिक्तं तप इति कथितः स्वध्वरश्चास्य कर्ता
अहिर्बुध्न्योऽप्यन्ववादीदगणि दिविषदामुत्तमं गुह्यमेतत्।
साक्षान्मोक्षाय चासौ श्रुत इह तु मुधा बाध शङ्का गुणाढ्ये
तन्निष्ठो ह्यन्य निष्ठान् प्रभुरतिशयितुं कोटि कोट्यंशतोऽपि॥ ९ ॥

नाना शब्दादि भेदादिति तु कथयता सूत्रकारेण सम्यक्
न्यासोपासे विभक्ते यजन हवनवच्छब्द भेदादभाक्तात्।
आख्या रूपादि भेदः श्रुत इतरसमः किं च भिन्नोऽधिकारः
शीघ्र प्राप्त्यादिभिः स्याज्जगुरिति च मधूपासनादौ व्यवस्थाम्॥ १० ॥

यत्किञ्चिद्रक्षणीयं तदवन निपुणे न्यस्यतोऽकिञ्चनस्य
प्रस्पष्टं लोक दृष्ट्याऽप्यवगमित इह प्रार्थनाद्यङ्ग योगः।
तस्मात् कर्माङ्गकत्वं व्यपनयति परापेक्षणाभाव वादः
साङ्गे त्वष्टाङ्ग योग व्यवहृति नयतः षड्विधत्वोपचारः॥ ११ ॥

पञ्चाप्यङ्गान्यभिज्ञाः प्रणिजगुरविनाभाव भाञ्जि प्रपत्तेः
कैश्चित् संभावितत्वं यदिह निगदितं तत् प्रपत्त्युत्तरं स्यात्।

अङ्गेष्वङ्गित्व वादः फल कथनमिह द्वि त्रि मात्रोक्तयश्च
प्राशस्त्यं तत्र तत्र प्रणिदधति ततः सर्ववाक्यैककण्ठ्यम्॥ १२ ॥

रक्षापेक्षा स्वसाह्य प्रणयवति भरन्यास आज्ञादि दक्षे
दृष्टा नाऽत्र प्रपत्ति व्यवहृतिरिह तन्मेळने लक्षणं स्यात्।
गेहागत्यादि मात्रे निपततु शरणागत्यभिख्योपचारात्
यद्वाऽनेकार्थ भावाद्भवति हि विविधः पालनीयत्व हेतुः॥ १३ ॥

आत्मात्मीय स्वरूप न्यसनमनुगतं यावदर्थं मुमुक्षोः
तत्त्वज्ञानात्मकं तत् प्रथममथ विधेः स्यादुपाये समेतम्।
कैङ्कर्याख्ये पुमर्थेऽप्यनुषजति तदप्यर्थना हेतुभावात्
स्वाभीष्टानन्य साध्यावधिरिह तु भरन्यास भागोऽङ्गिभूतः॥ १४ ॥

न्यासादेशेषु धर्म त्यजन वचनतोऽकिञ्चनाधिक्रियोक्ता
कार्पण्यं वाऽङ्गमुक्तं भजनवदितरापेक्षणं वाऽप्यपोढं।
दुःसाधेच्छोद्यमौ वा क्वचिदुपशमितावन्यसंमेळने वा
ब्रह्मास्त्र न्याय उक्तस्तदिह न विहतो धर्म आज्ञादि सिद्धः॥ १५ ॥

आदेष्टुं स्वप्रपत्तिं तदनुगुण गुणाद्यन्वितं स्वं मुकुन्दो
मामित्युक्त्वैकशब्दं वदति तदुचितं तत्र तात्पर्यमूह्यम्।
तत्प्राप्य प्रापकैक्यं सकल फलदतां न्यासतोऽन्यानपेक्षां
प्राधान्याद्यं च किञ्चित् प्रथयति स परं श्रीसखे मुक्त्युपाये॥ १६ ॥

स्वाभीष्ट प्राप्ति हेतुः स्वयमिह पुरुषैः स्वीकृतः स्यादुपायः
शास्त्रे लोके च सिद्धः स पुनरुभयथा सिद्ध साध्य प्रभेदात्।
सिद्धोपायस्तु मुक्तौ निरवधिक दयः श्रीसखः सर्वशक्तिः
साध्योपायस्तु भक्तिर्न्यसनमिति पृथक् तद्वशीकार सिद्ध्यै॥ १७ ॥

अत्यन्ताकिञ्चिनोऽहं त्वदपचरणतः सन्निवृत्तोऽद्य नाथ
त्वत्सेवैकान्त धीः स्यां त्वमसि शरणमित्यध्यवस्यामि गाढम्।
त्वं मे गोपायिता स्यास्त्वयि निहितभरोऽस्म्येवमित्यर्पितात्मा
यस्मै स न्यस्त भारः सकृदथ तु सदा न प्रयस्येत् तदर्थम्॥ १८ ॥

त्यक्त्वोपायानपायानपि परमजहन्मध्यमां स्वार्ह वृत्तिं
प्रायश्चित्तं च योग्यं विगत ऋणततिर्द्वन्द्व वात्यां तितिक्षुः।
भक्ति ज्ञानादि वृद्धिं परिचरणगुणान् सत्समृद्धिं च युक्तां
नित्यं याचेदनन्यस्तदपि भगवतस्तस्य यद्वाऽऽप्त वर्गात्॥ १९ ॥

आज्ञा कैङ्कर्य वृत्तिष्वनघ गुरुजन प्रक्रिया नेमि वृत्तिः
स्वार्हानुज्ञात सेवा विधिषु च शकने यावदिष्टं प्रवृत्तः।
कर्म प्रारब्ध कार्यं प्रपदन महिम ध्वस्त शेषं द्विरूपं
भुक्त्वा स्वाभीष्ट काले विशति भगवतः पादमूलं प्रपन्नः॥ २० ॥

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्य वर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितर गतिभिः सद्भिरास्थीयमानाम्।
वेदान्ताचार्य इत्थं विविध गुरुजन ग्रन्थ संवादवत्या
विंशत्या न्यासविद्यां व्यवृणुत सुधियां श्रेयसे वेङ्कटेशः॥ २१ ॥

संसारावर्त वेग प्रशमनशुभदृग्देशिक प्रेक्षितोऽहं
संत्यक्तोऽन्यैरुपायैरनुचित चरितेष्वद्य शान्ताभिसन्धिः।
निःशङ्कस्तत्वदृष्ट्या निरवधिकदयं प्रार्थ्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि॥ २२ ॥

॥ इति श्रीन्यासविंशतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥